National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 19-21
© 2025 NJHSR
www.sanskritarticle.com

**डॉ. हृषिकेशसाहुः**
सहायक-प्राध्यापकः,
ज्योतिषविभागः,
कविकुलगुरु-कालिदास-संस्कृत विश्वविद्यालयः रामटेकम्

**Correspondence:**
**डॉ. हृषिकेशसाहुः**
सहायक-प्राध्यापकः,
ज्योतिषविभागः,
कविकुलगुरु-कालिदास-संस्कृत विश्वविद्यालयः रामटेकम्

# प्राचीनभारते प्रोद्योगिकी शिक्षा

**डॉ. हृषिकेशसाहुः**

प्राचीनकाले भारतवर्षं विविधप्रकारेषु विज्ञानेषु, उद्योगेषु, कलासु, व्यवसायेषु च समुन्नतमासीत्। चिकित्साविज्ञानं, वनस्पतिविज्ञानं, प्राणिविज्ञानं, भौतिकविज्ञानं, गणितं, ज्योतिषं च विज्ञानानि समृद्धान्यासन्निति प्राचीनसाहित्ये समुपलभ्यन्ते । भारतीयकुटीरो- द्योगैः निर्मितानि वस्तूनि विदेशेष्वपि प्रसिद्धानि आसन्। भारतीयसैनिकाः भारतीयप्रोद्यगा- नामुपयोगं कृत्वा विस्तृतसाम्राज्यस्य निर्माणं चक्रुः। गृहनिर्माणकला-मूर्तिकला-चित्रकलादीनां विकसितरूपस्य प्रमाणमपि अस्माकं प्राचीनसाहित्ये उपलभ्यते ।

पाण्डवानां राजधानी इन्द्रप्रस्थनगरी मयेन निर्मितेति महाभारते विवरणं वर्तते । यातायातस्य विविधसाधनानां विषयेऽपि तत्रोल्लेखः वर्तते। तत्र विज्ञानस्य, विद्यायाः, कलायाश्च प्रशिक्षणे निश्चितव्यवस्था आसीत्। प्राचीनग्रन्थेषु यद्यपि औद्योगिकशिक्षायाः विस्तृतं स्पष्टं च वर्णनं नास्ति, तथापि औद्योगिकविषयाणां शिक्षाव्यवस्थायाः सङ्केतः प्राप्यते। महाभारतानुसारेण परशुरामस्याश्रमः युद्धशिक्षणार्थं प्रसिद्ध आसीत्। अत्र भीष्मः कर्णश्च धनुर्विद्याम् अधीतवन्तौ। जीवकनाम्ना महान् चिकित्सकोऽपि तक्षशिलायाम् आयुर्वेदस्य शिक्षां प्राप्तवान्। प्राचीनभारतस्य प्रोद्योगिकशिक्षासु आयुर्वेदशिक्षा, पश्वायुर्वेदशिक्षा, धनुर्वेदशिक्षा, शिल्पशिक्षा, व्यवसायिकशिक्षा, कलाशिक्षा च प्रमुखाः आसन्। तेषामुपस्थापनमत्र क्रमशः क्रियते।

**आयुर्वेदशिक्षा** - भारतस्य औषधविज्ञानं बहुप्राचीनं वर्तते। आयुर्वेदस्य शिक्षणपद्धतिः प्रमुखस्थान-मावहति। आयुर्वेदस्य गणना उपवेदरूपेण क्रियते। चतुर्णां वेदानां चत्वार उपवेदाः सन्ति। ते यथा - ऋग्वेदस्य उपवेदः आयुर्वेदः, यजुर्वेदस्य धनुर्वेदः, सामवेदस्य गान्धर्ववेदः, अथर्ववेदस्य अथर्ववेदश्च भवति। परन्तु सुश्रुतेन अथर्ववेदस्य उपवेदः "आयुर्वेदः" इत्युक्तम्। तद्यथा - **"इह खलु आयुर्वेदो नाम यदुपाङ्गमथर्ववेदस्य"**।[1] मानवजीवनस्य चत्वारः पुरुषार्थाः धर्म-अर्थ-काम-मोक्षाः भवन्ति । एतेषां परिपालनं तदा एव भवितुम् अर्हति यदा शरीरं स्वस्थं भवति । आरोग्यं हि धर्म-अर्थ-काम-मोक्षादीनां मूलम् इति चरकसंहितायामुक्तं वर्तते। तद्यथा-

**धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्।**
**रोगास्तस्यापहर्तारः स्रोतसो जीवितस्य च।।**[2]

अत एव स्वस्थं जीवनं यापयितुं रोगान् दूरीकर्तुं च आयुर्वेदस्याध्ययनम् अत्यावश्यकम्। आयुर्वेदशिक्षायाः कृते उपनयनादिसंस्काराणाम् उपयोगः क्रियते स्म। शिष्याय शरीरस्य शुद्धता अपेक्षिता आसीत्। सः मनसा, वचसा च पवित्रो भवेत्। स्म। शिष्योऽपि आचार्यस्य समादरं कृत्वा विविधनियमानां परिपालनं करोति स्म। आचार्यः शिष्यस्य योग्यतायाः आचरणस्य च परीक्षणं कृत्वा शिष्यरूपेण तं स्वीकरोति चरकसंहितासूत्रस्थाने चिकित्सकस्य योग्यताविषये विस्तृतविवरणं वर्तते । तद्यथा-

**योगवित्रामरूपज्ञस्तासां तत्त्वविदुच्यते।**
**किं पुनर्यो विजानीयादोषधीः सर्वथा भिषक्।**
**योगमासां तु यो विद्याद् देशकालोपपादितम्।**
**प्रथमं पुरुषं वीक्ष्य स विज्ञेयो भिषक्तमम्।**[3]

आयुर्वेदचिकित्सायां चत्वारि तत्त्वानि प्रमुखानि भवन्ति । तानि यथा-चिकित्सकः, औषधं, परिचारकः, रोगी च। चिकित्सकस्य शास्त्रज्ञानं, कर्मसम्पादनं, दक्षता, स्वच्छतादिगुणाः भवन्ति। पर्याप्तोपलब्धिः, रोगानुगुणं योग्यता, एकेन द्रव्येण विविधकल्पना, अविकृतरूपम् इत्यादयः औषधिगुणाः। उपचारज्ञताः, दक्षता, भर्तृरनुरागताः, पवित्रता व परिचारकस्य गुणाः। रोगस्य इतिहासस्मरणं, चिकित्सकस्य निर्देशपालनं, रोगप्रभावात् अविचलितः, रोगलक्षणस्य प्रकटनञ्च रोगस्य गुणाः भवन्ति। आयुर्वेदस्य त्रयः स्कन्धाः महत्त्वपूर्णाः सन्ति । हेतुः, लिङ्गम्, औषधज्ञानं चेति । चरकसंहितायां तदुक्तम् -

**हेतुलिङ्गौषधज्ञानं स्वस्थातुरपरायणम् ।**
**त्रिसूत्रं शाश्वतं पुण्यं बुबुधे यं पितामहः ।।**[४]

शिष्यः रोगिणो वैयक्तिककारणं ज्ञात्वा लक्षणानुगुणं औषधस्य प्रयोगे रोगस्य उपचारं कुर्यात् । आयुर्वेदस्य अष्टौ अङ्गानि शिष्येण ज्ञातव्यानि। आयुर्वेदशिक्षायाः अवधिः कियत्कालपर्यन्तमासीदिति अस्मिन् विषये स्पष्टप्रमाणं नोपलभ्यते। आयुर्वेदविज्ञानम् अनन्तमिति चरकसंहितायां सुश्रुसंहितायाञ्च उक्तं वर्तते । जातककथाभ्यः ज्ञायते यत् जीवकः तक्षशीलायां सप्तवर्षाणि यावत् आयुर्वेदाध्ययनं कृतवान्। अनेन स्पष्टीभवति यत् आयुर्वेदाध्ययनस्यअवधिः सुदीर्घा आसीदिति । शिक्षासमास्यनन्तरं शिष्यस्य परीक्षा भवति स्म। तदनन्तरं चिकित्साकार्यस्य शुभारम्भं कर्तुं शिष्याय अनुमतिर्दीयते स्म। शिक्षासमास्यनन्तरं समापनसंस्कारः आयोज्यते स्म। समापनसंस्कारावसरे आचार्यः शिष्याय उपदेशं ददाति स्म।" आचार्योपदेशस्य विस्तृतं वर्णनं चरकसंहितायाः विमानस्थाने समुपलभ्यते । **"राजाज्ञया विना नैव जनैः कार्य चिकित्सितम्"**[५] इति शुक्रेणोक्तम्।

**पश्वायुर्वेदशिक्षा** - पश्वायुर्वेदनाम्ना प्रसिद्धा पशुचिकित्सापद्धतिः भारतीयपरम्परायामति-प्राचीनाऽस्ति। युद्धकृते युद्धोपयोगिपशूनाम् अश्वगजानाञ्च गवादिपालितपशूनाञ्च बढ़ावश्यकता आसीत्। एतेषां पशूनां समुचितं ज्ञानं कारयितुं भारते पशुचिकित्सायाः अध्ययनस्य प्रशिक्षणस्य च व्यवस्था आसीत्। पश्वायुर्वेदस्य तिस्रः शाखाः भवन्ति -गजायुर्वेदः, अश्वाायुर्वेदः, गवायुर्वेदश्च। पलिकाप्यः गजायुर्वेदस्य प्रमुख आचार्यः आसीत्। शालिहोत्रः पशुविज्ञानस्य प्रथमाचार्य इत्युच्यते। राजा नलः अश्वविद्यायाः महान् पण्डितः आसीत्। पाण्डवेषु नकुलः अश्वविज्ञानस्य तथा च सहदेवः गाविज्ञानस्य विशेषज्ञः आसीत्। सम्राट् अशोकः भारतवर्षे पशुचिकित्सालयानां स्थापनं कृतवान्। भारतवर्षे पशुचिकित्सासम्बन्धे बहुग्रन्थाः विरचिताः। तेषु ग्रन्थेषु पालिकाप्यस्य हस्त्यायुर्वेदः, नारायणस्य मातङ्गलीला, शालिहोत्रस्य अश्वशास्त्रम्, जयदत्तस्य अश्ववैद्यकः, नकुलस्य अश्वचिकित्सा इत्यादयः ग्रन्थाः प्रसिद्धाः ।

प्राचीनकाले सामान्यजनेषु पशुपालनस्य प्रवृत्तिरपि प्रबला आसीत्। अतः पशुधनं श्रेष्ठधनमिति मन्यते स्म। पशूनां संरक्षणाय चिकित्साव्यवस्था आसीत् सुदृढा। रोगग्रस्तः पशूः चिकित्सकाय प्रेष्यते स्म। **"उतैनां ब्राह्मणे दद्यात्"**[६] इति अथर्ववेदे उल्लेखो वर्तते। पशुचिकित्सकानां कृते अथर्ववेदे "यत्रा सुहार्दः सुकृतो मनन्ति" इति उक्तिरस्ति। अस्याः व्याख्यां कुर्वन् सायणाचार्येणोक्तम् **- " यत्र यस्मिंश्च लोके सुहार्दः शोभनहृदयाः सुकृतः शोभनकर्माणः पुरुषा मन्दन्ति हृष्यन्ति**[७]। पशुचिकित्सालयस्य व्यवस्था एतादृशी भवेत् यत्र गत्वा पशवः नीरोगाः स्युः **"विहाय रोगं तन्वः रवाया" इति**[८]। अथर्ववेदस्य एकस्मिन् मन्त्रे उक्तं वर्तते यत् औदुम्बरमणिः पशूनां कृते पुष्टिकारकः सन्ततिप्रदानकारी, दुग्धवर्धकश्चेति। तथाहि -

**औदुम्बरेण मणिना पुष्टिकामाय वेधसा।**
**पशूनां सर्वेषां स्फातिं गोष्ठे मे सविता करन् ।।**[९]

**धनुर्वेदशिक्षा** - प्राचीनकाले विभिन्नेषु जनपदेषु जातिषु च प्रायः युद्धं भवति स्म । एतदर्थं सैन्यशिक्षाया आवश्यकता आसीत् । तदानीम् अनेकाः जातयः योद्धजातिरूपेण प्रसिद्धा आसन् । शासकाः प्रजाश्च देशरक्षार्थम् आत्मरक्षार्थं च सैन्यशिक्षायाः प्रशिक्षणं कुर्वन्ति स्म। वैदिकवाङ्मये आर्य-आर्येतरेषु राजसु च निरन्तरं प्रचाल्यमानस्य युद्धस्य वर्णनं उपलभ्यते ।

भगवान् शिवः धनुर्वेदस्य प्रथम आचार्य इत्युच्यते । हिमालये तस्य शिक्षाकेन्द्रम् आसीत्। कात्तिकयः परशुरामश्च तस्य शिष्यौ अभवताम्। आर्यपरम्परायां सैन्यविभाजनं प्रायशः चतुर्ष वर्गेषु भवति स्म । यथा रथसेना, अश्वसेना, गजसेना, पदातिसेना चेति। इयं सेना चतुरङ्गिणी इति प्रसिद्धा। विशेषपरिस्थितौ नौसेनायाः सङ्घटनमपि क्रियते स्म। सेनानायकेभ्यः सेनासञ्चालनस्य प्रशिक्षणमवश्यं दीयते स्म ।

प्राचीनकाले सैन्यशिक्षायाः कृते विशेषविद्यालयानां व्यवस्था आसीत् । रामायणमहा-भारतप्रभृतिषु ग्रन्थेषु अस्य प्रमाणं सम्प्राप्यते। गुरुकुलेषु सैन्यशिक्षाप्रबन्धनस्य व्यवस्था क्रियते स्म। राम-लक्षण-भरत-शत्रुघ्नाः गुरोः वशिष्ठस्य गुरुकुले सैन्यशिक्षां प्राप्ता आसन् । महर्षिणा विश्वामित्रेण रामलक्ष्मणाभ्यां जृम्भकास्त्रादिसञ्चालनस्य प्रशिक्षणं प्रदत्तम् । भीष्म-द्रोण-कर्णादयः परशुरामस्य शिष्याः आसन्। द्रोणः महाभारतकाले धनुर्वेदे प्रमुख आचार्यः आसीत् ।

राजकुमाराणां शिक्षायै सैन्यशिक्षायाः पृथक् विद्यालयस्था-पनोल्लेखः महाभारते प्राप्यते। कौरव-पाण्डवानां सैन्यशिक्षायाः कृते भीष्मेन हस्तिनापुरात् बहिः गङ्गायाः तटे सैन्यविद्यालयस्य स्थापना विहिता। राजपुत्रस्य चन्द्रापीडस्य शिक्षार्थम् उज्जयिनीनरेशः तारापीडः नगरात् बहिः शिप्रानदीतटे सैन्यविद्यालयस्य स्थापनां कृतवान्"। जातकसाहित्यानुसारं तक्षशीला सैन्यशिक्षायाः प्रमुखं केन्द्रमासीत्। सैन्यविज्ञाने दक्षताप्रास्त्यर्थ सुदुरात् राजकुमाराः तत्र समागच्छन्ति स्म। एकस्याः कथायाः आधारेण ज्ञायते यत् तक्षशीलायां १०३ राजकुमाराः गजचर्यायाः, रथचर्यायाः, अश्वारोहणस्य, विविधायुधानां शिक्षां प्रासुवन्ति स्म। मौर्यचन्द्रगुप्तेन चाणक्येन च तक्षशीलातः सैन्यविज्ञानस्य राजनीतेश्च शिक्षा प्राप्ता। सैन्यशिक्षायाः कृते उपनयन-समावर्तनादिसंस्काराः अनुष्ठीयन्ते स्म। समावर्तनसंस्कारः **"छुरिकाबन्धनम्"**[१०] इति नाम्नाऽभिधीयते। अस्य विस्तृतवर्णनं वीरमित्रोदये दृश्यते।

**शिल्पशिक्षा-** विविधप्रकाराणां शिल्पानाम्, उद्योगानं, कलानाञ्च-भिवृद्धिः प्राचीनभारते अभवत्। कृषिः, पशुपालनं, वाणिज्यं चेत्यादिभिः सह शिल्पोद्योगाः विकसिताः जाताः। गृहोद्योगरूपेण एतेषामुपयोगः क्रियते स्म। काष्ठ-मृत्तिका प्रस्तरधात्वादि-प्राकृतिकपदार्थैः अनेकेषां जनोपयोगिवस्तूनां निर्माणं शिल्पिनः कुर्वन्ति स्म । एतेषां वस्तूनां देशात् बहिः प्रेषणं भवति स्म ।
"शिल्पम्" इति शब्दस्य व्युत्पत्तिः "शील-समाधौ" इति धातोः "प" प्रत्ययेन भवति । अस्यार्थो भवति - "यत् शीलति समादधाति तत् शिलम्" अर्थात् पदार्थान् विशिष्टविधिना मेलयित्वा एकस्य नवीनपदार्थस्य रचनैव शिल्पम्। शिल्पमेकं विज्ञानमिति शास्त्रकारैः भणितम्। तद्यथा-

**विज्ञानमुच्यते शिल्पं हेमकुप्यादिसंस्थितिः ।**
**नृत्यादिकं च तच्छिक्षन् कर्यात् कर्म गुरुगृहे ।।**[११]

शिल्पविषये देवणभट्टेनोक्तम् - "कङ्कणकटकादिनिर्माणविषयं नृत्यगीतादिकरणविषयं चकारात् स्तम्भकुम्भादिरचनाविषयं विज्ञानं शिल्पमुच्यते"। पालिसाहित्ये विविधशिल्पानां विवरणं प्राप्यते। "मिलिन्दपन्हः" नामकग्रन्थे ऊनविंशतिशिल्पानां नामानि परिगणितानि । कौटल्यस्य अर्थशास्त्रे विविधौद्योगिकगतिविधीनां शिल्पानाञ्च नामोल्लेखः जायते। विभिन्नानां शिल्पानां गतिविधीनां नियन्त्रणं कर्तुम् ऊनविंशति- अध्यक्षाणां नियुक्तिः कौटल्येन कृता। जातकसाहित्येऽपि अष्टादश १८ शिल्पिनामुल्लेखो जातः ।

प्राचीनभारतीयसमाजे शिल्पिनां बहुसमादरः आसीत्। वैदिककाले १२ रत्निषु रथकारस्य गणना क्रियते स्म। "ऋभु" इति शिल्पकारस्य हस्तकौशलस्य हेतोः सः देवत्वं प्राप्तवान् आसीदिति अस्य शब्दस्य प्रयोगः दृश्यते। प्राचीनभारते आयुधनिर्माणं, सेतुनिर्माणं, छायाचित्रनिर्माणं, परश्वादिउपकरणनिर्माणं, गृहनिर्माणं, वस्त्रवयनम् इत्यादि शिल्पानां विकासोऽभवत्। तस्मिन् समये समाजे विविधप्रकारकाः शिल्पिनः आसन्। तेषु तक्षः, रथकारः कुलालः, कर्मकारः, इषुकारः, धनुष्कारः, ज्याकारः, रज्जुसर्जः, सूतः, शैलूषः, मणिकारः, कण्टकीकारः, पेशिता, अञ्जनकारः, गीतकारः, नृत्यकारः, वाद्यकारः, हिरण्यकारः, लौहकारः, कुम्भकारः इत्यादयः प्रमुखाः आसन् ।

यः जनः शिल्पविद्यां प्राप्तुमिच्छति स्म तस्य कृते बहवः नियमाः निर्धारिताः आसन्। सः गुरुगृहे स्थित्वा वाञ्छितशिल्पस्य अध्ययनं करोति स्म। गुरुशिष्ययोर्मध्ये पिता-पुत्रयोः यथा घनिष्ठः सम्बन्धः आसीत्। प्राचीनकाले विभिन्नवर्गाणां शिल्पिनां कृते शिल्पिसङ्घट-नमपि आसीत्। विशिष्टशिल्पानां शिक्षणस्य प्रबन्धनं शिल्पिसङ्घटनेन क्रियते स्म।

**व्यावसायिकशिक्षा -** प्राचीनभारते अर्थोपार्जनस्य त्रीणि प्रमुखस्रोतांसि आसन् - कृषिः, पशुपालनम्, उद्योगश्चेति । आर्याणां व्यवसायः देशस्य अन्तरैव सीमितः नासीत् परन्तु देशात् बहिनः अन्यदेशैः सह अपि आसीत् । व्यवसाये जलमार्गस्य स्थलमार्गस्य च उपयोगः भवति स्मः। व्यवसायं समुन्नतं कर्तुं व्यावसायिकशिक्षायाः प्रबन्धनस्य च आवश्यकता आसीत्। मनु कौटल्यादिशास्त्रकारैः व्यावसायिकशिक्षासन्दर्भे विविधनियमानां निर्धारणं कृतमासीत् ।

व्यवसायी वस्तूनां गुण- दोषान्, क्रयविक्रयमूल्यञ्च अवश्यं जानीयात् । विभिन्नदेशानां मुद्राप्रणाली, भाषा, परम्पराः, रीतयः इत्यादीनां विषये तस्य समुचितज्ञानमपि भवेत् । पुराकाले व्यवसायः जात्याधारेण वर्णाधारेण च भवति स्म। वैश्याः प्रायः व्यापारकर्मणि संलग्ना आसन्। व्यावसायिकशिक्षायाः विकासाय व्यावसायिकशिक्षा-संस्थानां स्थापनं व्यवसायिसङ्घटनपक्षतः क्रियते स्म ।

कलाशिक्षा प्राचीनभारते कलानां महत्त्वमासीत्। प्राचीनशिक्षा-पद्धतौ अपि एतासो शिक्षणव्यवस्था सुपरिकल्पिता आसीत्। तदानीन्तनकाले सर्वे व्यावहारिकविषयाः कलारूपेण स्वीकृताः। कृषि, पशुपालनं, वाणिज्यम्, उद्योगः, युद्धम् इत्यादिभिः सम्बन्धिविषयाः कलासु अन्तर्भवन्ति स्म। रामायणमहाभारतपुराणकामसूत्रललित-विस्तर-शुक्रनीतिप्रभृतिग्रन्थेषु कलानां विस्तृतं वर्णनं दृश्यते। कालिदास-भवभूति-दण्डि-श्रीहर्ष-बाणभट्ट-भारविप्रभृतीनां कवीनां काव्येष्वपि नर्तनवादनादिचतुः षष्टिकलानां रोचकं वर्णनं विद्यते।

प्राचीनभारतीयशिक्षापद्धतेः सम्यक् परिशीलनेन ज्ञायते यत् प्राचीनकाले प्रोद्योगिकी शिक्षा सुसमृद्धा आसीत्। प्रोद्योगिकशिक्षायाः विकासाय देशे प्रबन्धनस्य प्रशिक्षणस्य च व्यवस्था सुदृढा आसीदिति।

**सन्दर्भसूची –**

१.सुश्रुतसंहिता - १.६ ।
२. चरकसंहिता - सूत्रस्थानम्-१.१५ ।
३. तत्रैव - १.१२०-१२१ ।
४. तत्रैव - १.२३१ ।
५. शुक्रनीतिसारः - १.३०४ ।
६. अथर्ववेदः ३.२८.२ ।
७. अथर्ववेदः (सायणभाष्यम्) ३.२८.३ ।
८. तत्रैव - ३.२८.५ ।
९. तत्रैव - १९.३१.१ ।
१०. वीरमित्रोदयः पृ.सं. ५८०।
११. स्मृतिचन्द्रिका, देवणभट्टः ।